संस्कृतवार्ताः

23/03/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

- विदेशमन्त्री एस जयशङ्करः अवदत् यत् भारतस्य प्रमुखः कूटनीतिकोद्देश्य: आगामिदशाब्देषु अनुकूलोर्जासम्पन्नस्य वातावरणस्य निर्माणम् इत्यस्ति।
- छत्तीसगढ़स्य बीजापुरजनपदे अद्य  द्वाविंशति-नक्सलवादिनः आत्मसमर्पणम् अकुर्वन्।
- राष्ट्रिय-स्वयंसेवक-सङ्घः (आर्. एस्. एस्.) इति विजयदशम्याम् स्व-शतवर्षपूर्त्यवसरे  सामाजिक-सहभागितां प्रोत्साहयितुं अनेकान् कार्यक्रमान्  आयोक्ष्यते।
- राष्ट्रमद्य भारतीय-स्वातन्त्र्य-संग्राम-दिवसमालक्ष्य भारतस्य स्वातन्त्र्यसंग्रामस्य महाक्रान्तिकारिभ्यः भगतसिंहाय, शिवरामराजगुरवे, सुखदेवथापराय इत्येतेभ्यश्च श्रद्धाञ्जलिं निवेदयति सममेव प्रधानमन्त्री श्री नरेन्द्र मोदी  अवोचत् यत् स्वातन्त्र्यस्य न्यायस्य च कृते तेषां  निर्भीकप्रयासः देशस्य जनान् सर्वदापि प्रेरयिष्यति।
- नवदिल्लयां खेलोइंडिया पैरा प्रतिस्पर्धासु लक्ष्य वेधप्रतिस्पर्धायां पैरालंपिक पदक विजेत्री शीतल देवी इत्येषा स्वर्ण पदंक, पायल नाग:, इत्येषा रजत पदकं, ज्योति: च कांस्य पदकं विजितवती।

<u>विदेशमन्त्री एस जयशङ्करः</u>

विदेशमन्त्री एस जयशङ्करः अवदत् यत् भारतस्य प्रमुख-कूटनीतिकोद्देश्य: आगामिदशाब्देषु अनुकूलोर्जासम्पन्नस्य वातावरणस्य निर्माणम् इत्यस्ति। ह्यः मुम्बईनगरे कस्मिंचित् सञ्चारमाध्यमिकानां कार्यक्रमे भाषमाणः डॉ. जयशङ्करः अवदत् यत् दशाब्देषु वैश्वीकरणस्य गुणान् श्रुत्वा, अद्य विश्वं औद्योगिकनीतिभिः निर्यातनियन्त्रणैः, शुल्कयुद्धैश्च संघृष्यमाणमस्ति। सः अवोचत् यत् विश्वस्य  पञ्चमार्थव्यवस्थात्वेन भारतेन ऊर्जा-सम्बन्धानां  कश्चन व्यापकः संग्रहः  स्थापनीयः।

विदेशमन्त्री  अवदत् यत् **"सबका साथ, सबका विकास"** इति विचारः देशस्य विदेशनीतावपि प्रवर्तते। तेन उक्तं यत् भारतं तेषु कतिपयेषु देशेषु परिगण्यते, येन रुस्-यूक्रेन-इजराइल-इरान- लोकतन्त्रात्मकपश्चिम-वैश्विकदक्षिण-ब्रिक्स् क्वाड्-देशैस्सह मिलित्वा सहभागिताविष्कर्तुं शक्यते। सः प्रोक्तवान् यत् सुरक्षासदृशेषु संवेदनशीलक्षेत्रेषु भारतीयकूटनीतिः सुनिश्चयति यत् अस्माकं सशस्त्रबलानां व्यवसायिनाञ्च पार्श्वे व्यापकविकल्पाः भवेयुः।

## छत्तीसगढ़-माओवादिनः

छत्तीसगढ़स्य बीजापुरजनपदे अद्य द्वाविंशति-नक्सलवादिनः आत्मसमर्पणम् अकुर्वन्। एतेषु द्वे महिलेऽपि आस्ताम्। एतेषां नक्सलवादिनामुपरि आहत्य एकादशलक्षरुप्यकाणां पुरस्कारराशिः अपि समुद्घोषितः आसीत्। राज्यसर्वकारस्य नीत्यन्तर्गतं आत्मसमर्पण-कृतवद्भ्यः नक्सलवादिभ्यः पञ्चविंशतिसहस्त्ररुप्यकाणां प्रोत्साहनराशिः अपि प्रदत्तः।

## राष्ट्रिय-स्वयंसेवक-सङ्घः

राष्ट्रिय-स्वयंसेवक-सङ्घः (आर्. एस्. एस्.) इति विजयदशम्याम् स्व-शतवर्षपूर्त्यवसरे सामाजिक-सहभागितां प्रोत्साहयितुं अनेकान् कार्यक्रमान् आयोक्ष्यते। अवधेयं यत् अद्य बेङ्गलूरुनगरे सङ्घस्य अखिल-भारतीय-प्रतिनिधि-सभायाः त्रि-दिवसीय-राष्ट्रिय-सम्मेलनस्य समापनविषये वार्ताहरान् सम्बोधयन् आर्. एस्. एस्. इत्यस्य महासचिवः दत्तात्रेय-होसबोले इत्येषः अवोचत् यत्, एष: औपचारिकोत्सवः न भविष्यति, तथापि अस्मिन् वर्षे विजयदशम्याम् आर्. एस्. एस्. इत्यस्य स्थापनादिने विविधाः प्रसार-कार्यक्रमाः आरप्स्यन्ते। सः एतदपि अब्रवीत् यत् एते कार्यक्रमाः समाजस्य उन्नतये विभिन्नेषु कार्येषु सामाजिक-सहभागित्वं अन्वेषयति इति। होसबोले वर्यः अवदत् यत् सामाजिक-सौहार्दं, राष्ट्रिय-एकतां च प्रोत्साहयितुं मूलस्तरे जनसम्पर्क-कार्यक्रमाः भविष्यन्ति इति।

औरंगजेबविवादस्य सम्बन्धे श्री होसबाले अकथयत् यत् औरंगजेब: भारतीय लोकाचारस्य, सांस्कृतिक-मूल्यानाञ्च प्रतिनिधित्वं न करोति। अस्मिन्नेव क्रमे एकस्यान्यस्य प्रश्नस्य उत्तरं यच्छन् स: प्रोक्तवान् यत् धर्माधारितारक्षणं संवैधानिकं नास्तीति।

## हुतात्मदिवस:

राष्ट्रमद्य भारतीय-स्वातन्त्र्य-संग्राम-दिवसमालक्ष्य भारतस्य स्वातन्त्र्यसंग्रामस्य महाक्रान्तिकारिभ्यः शहीद-ए-आज़म भगतसिंहाय, शिवरामराजगुरवे, सुखदेवथापराय इत्येतेभ्यश्च श्रद्धाञ्जलिं निवेदयति। इमे एकत्रिंशदधिक-एकोनविंशतितमवर्षस्य अस्मिन्नेव दिने लाहौरनगरस्य सेंट्रलजेल इत्याख्ये कारावासे मृत्युदण्डेन दण्डिताः। साहसिकाः स्वातन्त्र्यसेनानिनः अष्टाविंशत्यधिक-एकोनविंशतितमवर्षस्य दिसम्बरमासस्य सप्तदशदिनाङ्के लाहौरनगरे ब्रिटिश-आरक्ष्याधिकारि जे.पी. सॉन्डर्स इत्यस्य वधारोपेण अभियुक्तीकृताः आसन्, सहैव अन्ते च ते मृत्युदण्डेन दण्डिताः अभवन्। एतेषां बलिदानं भारतीयजनानां सामूहिकस्मृतिपटले प्रगाढतया अङ्कितमस्ति, यः राष्ट्रं स्वातन्त्र्यस्य ऐक्यस्य च आदर्शपालनाय सर्वदापि प्रेरयति। प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य हुतात्मदिवसमालक्ष्य स्वातन्त्र्यसैनिकेभ्यः भावमयं श्रद्धाञ्जलिं प्रत्यवेदयत। सामाजिकान्तर्जालेन प्रकाशिते एकस्मिन् चलचित्रसन्देशे सः अवोचत् यत् स्वातन्त्र्यस्य न्यायस्य च कृते तेषां निर्भीकप्रयासः देशस्य जनान् सर्वदापि प्रेरयिष्यति।

## मनसुख माण्डविया

युवा-कार्यक्रम-खेल मन्त्री डॉ० मनसुख माण्डविया दैनन्दिनजीवने नियमित व्यायामस्योपरि द्विचक्रिकायानचालनमालक्ष्य च बलं अयच्छत्। तेन अद्य लखनऊ नगरात् **"फिट इंडिया संडेज ऑन साइकिल"** इति अभियानस्य आरम्भो विहित:। श्री माण्डविया अवोचत् यत् द्विचक्रिका चालनेन शरीर: स्वस्थ: भवति सममेव पर्यावरणमपि संरक्षितं भवति।

## प्रधानमन्त्री-राम-मनोहर-लोहिया

देशः स्वतन्त्रता-सैनिकाय डॉ. राम मनोहर लोहियावर्याय तस्य जयन्त्यवसरे स्मरति। समाजवादिनः राजनैतिक-नेतुः डॉ. लोहियावर्यस्य जन्म दशाधिक-एकोनविंशतितमे वर्षे उत्तरप्रदेशस्य अकबरपुरस्थाने समभवत्। तस्मै श्रद्धाञ्जलिं समर्पयन् प्रधानमन्त्री नरेन्द्रमोदी सामाजिकान्तर्जालिक-सन्देशे प्रोक्तवान् यत् डॉ. लोहियावर्य्यः दूरदर्शीनेता, प्रखरस्वतन्त्रता-सेनानी एवं सामाजिकन्यायस्य च प्रतीकः आसीदिति । तेन स्वीयजीवनं वञ्चितानां सशक्तिकरणे सुदृढराष्ट्रस्य च निर्माणाय नियोजितम्।

## खेलोइंडिया

नवदिल्ल्यां खेलोइंडिया-पैरा-प्रतिस्पर्धासु लक्ष्यवेधप्रतिस्पर्धायां पैरालंपिक-पदक विजेत्री शीतल देवी इत्येषा स्वर्णपदकं, पायल नाग:, इत्येषा रजत पदकं, ज्योति: च कांस्य पदकं विजितवती।

।। इति वार्ता:।।